# पाठ – 3

# डिजीभारतम्

---

## अभ्यासः

**Q1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

**(क) कुत्र "डिजिटल इण्डिया" इत्यस्य चर्चा भवति?**

**(ख) केन सह मानवस्य आवश्यकता परिवर्तते?**

**(ग) आपणे वस्तूनां क्रयसमये केषाम् अनिवार्यता न भविष्यति?**

**(घ) कस्मिन् उद्योगे वृक्षाः उपयुज्यन्ते?**

**(ङ) अद्य सर्वाणि कार्याणि केन साधितानि भवन्ति?**

**Answer.** (क) सम्पूर्णविश्वे

(ख) कालपरिवर्तनेन

(ग) रूप्यकाणाम्

(घ) कर्गदोद्योगे

(ङ) चलदूरभाषायन्त्रेण

**Q2. अधोलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत-**

**(क) प्राचीनकाले विद्या कथं गृह्यते स्म?**

**(ख) वृक्षाणां कर्तनं कथं न्यूनतां यास्यति?**

**(ग) चिकित्सालये कस्य आवश्यकता अद्य नानुभूयते?**

**(घ) वयम् कस्यां दिशि अग्रेसरामः?**

**(ङ) वस्त्रपुटके केषाम् आवश्यकता न भविष्यति?**

**Answer.** (क) प्राचीनकाले विद्या श्रुतिपरम्परया गृह्यते स्म।

(ख) संगणकस्य अधिकाधिकप्रयोगेण वृक्षाणां कर्तनं न्यूनतां यास्यति।

(ग) चिकित्सालये रूप्यकाणाम् आवश्यकता अद्य नानुभूयते।

(घ) वयं डिजीभारतम् इत्यस्यां दिशि अग्रे सरामः।

(ङ) वस्त्रपुटके रूप्यकाणाम् आवस्यकता न भवति।

**Q3. रेखांकितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**

**(क) भोजपत्रोपरि लेखनम् आरब्धम्।**

**(ख) लेखनार्थम् कर्गदस्य आवश्यकतायाः अनुभूतिः न भविष्यति।**

**(ग) विश्रामगृहेषु कक्षं सुनिश्चितं भवेत्।**

**(घ) सर्वाणि पत्राणि चलदूरभाषयन्त्रे सुरक्षितानि भवन्ति**

**(ङ) वयम् उपचारार्थम् चिकित्सालयं गच्छामः?**

**Answer.** (क) भोजपत्रोपरि किम् आरब्धम्?

(ख) लेखनार्थं कस्य आवस्यकतायाः अनुभूतिः न भविष्यति?

(ग) कुत्र कक्षं सुनिश्चितं भवेत्?

(घ) सर्वाणि पत्राणि कुत्र चलदूरभाषयन्त्रे सुरक्षितानि?

(ङ) वयं किमर्थं चिकित्सालयं गच्छामः?

**Q4. उदाहरणमनुसृत्य विशेषण विशेष्यमेलनं कुरुत-**

| | | | |
|---|---|---|---|
| यथा | – | विशेषण | विशेष्य |
| | | संपूर्णे | भारते |

| | | | |
|---|---|---|---|
| (क) | मौखिकम् | (1) | ज्ञानम् |
| (ख) | मनोगताः | (2) | उपकारः |
| (ग) | टंकिता | (3) | काले |
| (घ) | महान् | (4) | विनिमयः |
| (ङ) | मुद्राविहीनः | (5) | कार्याणि |

**Answer.** (क) मौखिकं ज्ञानम्

(ख) मनोगते काले

(ग) टंकितानि कार्याणि

(घ) महान् उपकारः

(ङ) मुद्राविहीनः विनिमयः

**Q5. अधोलिखितपदयोः सन्धिं कृत्वा लिखत-**
**पदस्य + अस्य**
**तालपत्र + उपरि**
**च + अतिष्ठत**
**कर्गद + उद्योगे**
**क्रय + अर्थम्**
**इति + अनयोः**
**उपचार + अर्थम्**

**Answer.** पदस्यास्य तालपत्रोपरि चातिष्ठत कर्गदोद्योगे क्रयार्थम् इत्यनयोः उपचारार्थम्

**Q6. उदाहरणमनुसृत्य अधोलिखितेन पदेन लघु वाक्य निर्माणं कुरुत–**

| | | | | |
|---|---|---|---|---|
| यथा | – | जिज्ञासा | – | मम मनसि वैज्ञानिकानां विषये जिज्ञासा अस्ति |
| | (क) | आवश्यकता | – | |
| | (ख) | सामग्री | – | |
| | (ग) | पर्यावरण सुरक्षा | – | |
| | (घ) | विश्रामगृहम् | – | |

**Answer.** (क) आवश्यकता - अद्यतने काले चलदूरवाण्याः अवश्यकता सर्वैरपि अनुभूयते।

(ख) सामग्री - रन्धनार्थं सामग्री आपणतः आनेतव्या।

(ग) पर्यावरणसुरक्षा - पर्यावरणसुरक्षायै अस्माभिः जागरूकैः भाव्यम्।

(घ) विश्रामगृहम् - सम्प्रति विश्रामगृहेषु प्रायशः डेविट्-कार्डमाध्यमेन रूप्यकाणि प्रदीयन्ते।

**Q7. उदाहरणानुसारम् कोष्ठकप्रदत्तेषु पदेषु चतुर्थी प्रयुज्य रिक्तस्थानपूर्तिं कुरुत–**
**यथा – भिक्षुकाय धनं ददातु। (भिक्षुक)**

**(क) ............ पुस्तकं देहि। (छात्र)**

**(ख) अहम् ............. वस्त्राणि ददामि। (निर्धन)**

**(ग) .............. पठनं रोचते। (लता)**

**(घ) रमेशः ................. अलम्। (सुरेश)**

**(ङ) ................. नमः। (अध्यापक)**

**Answer.** (क) छात्राय पुस्तकं देहि।

(ख) अहं निर्धनाय वस्त्राणि ददामि।

(ग) लतायै पठनं रोचते।

(घ) रमेशः सुरेशाय अलम्।

(ङ). अध्यापकाय नमः